No. १३३६

Title स्फोट वादः

Author ×

Extent १२ Age ×

Subject न्याय शास्त्रं

स्फोटवादः

१२३६

42

न्याय

स्फोटवाद

१ श्रीगणेशायनमः ॥ ननु कः स्फोटो नामेति चेत् शृणु वर्णस्फोटः पदस्फोटः वाक्यस्फोटः अखंडपद
वाक्यस्फोटौ वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इति वैयाकरणसिद्धांतः तत्र स्फुटत्यर्थोस्मा
दिति स्फोटो वाचक इति यावत् । एवं च वर्णस्फोटादिपदानां वर्णादयो वाचका इत्यर्थः तत्र ण
मो भवतीत्यादौ तत्तदानुपूर्व्यवच्छिन्नवर्णसमुदायरूपाः प्रकृतिप्रत्ययभागाः प्रयुज्यमानप
आ५ दवाक्यादौ प्रयुज्यमानाः वाचकाः ननु ते स्मृतादेशिन इति वर्णस्फोटपक्षः । सरीरस इत्यादावि
शेषकारणाभावात् तत्तदानुपूर्व्यवच्छिन्नेति प्रयुज्यमानपदान्तर्गतानां वर्णानां वाचकत्वं न वेति विप्रतिप नं४
त्तिशरीरं । अत्र विधिकोटिः परेषां निषेधकोटिरस्माकं । स्यादेतत् प्रयोगसमवायित्वादेर्णा भत राम
ऊ२ तिवादीनां बं [redacted] त्वात् संतत शक्ततावच्छेदकत्वनाप्यतेन वाचकत्वं किंतु ते स्मृतास्थानि भूता
लादयस्तत्र हि लत्वस्य जातिरूपस्यैकस्यैव शक्ततावच्छेदकत्वान्न तु भूलइत्यत्र तो विरोधः १

के२

स्यादिति वाच्यं बोधे भवतीति समभिव्याहारस्य कारणतायाः भवैं निस्तनौंधं वारणाय तत्र वाप्यावश्य
कत्वेन दोषाभावादिति चेन्न त्वत्कारमविदुषां बोधानापत्तेः नच तिङ्त्वेवशक्तिभ्रमात्तत्तो बोधः । प
दत्तदर्थयुघटितशक्तेर्भ्रमत्वस्योपपादयितुमशक्यत्वात् भ्रमत्वेमानाभावाच्च व्याकरणभेदेन कटु
चटादिभेदैः एमद्गत्यादौ सुसिर्वादिभेदैश्च स्थानिनामप्यनेकतया नैकशक्तता वच्छेदककल्पनापत्ते
स्तदवस्थत्वाच्च । न चैकरूपवत्तेषु शक्तिः विनिगमनाविरहात् । नच वैदांगतया पाणिनिव्याकरणबो
धितस्थानितां वाचकत्वमिति वाच्यं । अन्याध्ययनवतां बोधानापत्तेः तेषां शत्त्यभावेन लक्षणा
पि वक्तुमशक्या [redacted] । यत्तु रामइत्यादौ सुसिद्दत्यादेः शिभेदात् त्वयेन सर्वैर्व्याकरणमधीतं तस्य विनि
गमनाविरहेण बोधप्रतिबंधः स्यादिति तन्न । लिपिवत् स्यारकांनुगमस्यादोषत्वात् परस्मैबोह्वैध कृ रितं
सामर्थ्यतेनैव स्मृतेन बोधसंभवात् परन्तु वकृणां सातत्र सर्वैस्मैरिस्तदोषात् किं वशात् क्रियाहकृष्टी

२ रोमरिणा व्यवहारेणाश्रयमाणो[illegible]व शक्तियहात्तंच्यपिच मूलइत्सांत्तो बोधकारणायसमभिव्याह
2 रविशेषस्यकारणत्वावश्यकत्वेलाघवात्समभिव्याहारविषयवर्णेष्वेवशक्तिः शक्तमनो चिंतां अपि
चाद्देशीनां स्मरणाकत्वमनायांपदस्माकं वाचकत्तावच्छेदकं तत्रवमते स्मारकतावच्छेदकं वा अं
।येन केन चिद्रूपेण स्मारकत्वेति प्रसंगात्तनयाऽन्वतरहेतोरिष्तिमायेन तेषां वाचकतावच्छेदकत्वमेवो
चितं। यथा चेत्पादावनेकेषां स्मारकतावच्छेदकत्वापत्तेश्च। किंच स्थानिनां वाचकत्वे तिङः स्तुहेति
वाचकत्वं शत्राद्रिस्थले कर्त्रादिवाचकत्वमिति मीमांसकैयायिकसंमतानामवस्थानसिद्धेत। न च
मना २ कर्त्तेरिह दिस्तुशाव्वानज्ञादिनां कर्मार्थे इति वा चं। तस्य तद्विधावप्रहत्तेः। अन्यथा कर्मणिशानतयो राम
देर्लभ्यापत्तेरिस्वस्यत्र प्रपंचितं। न च तामार्थी यो भेदेनान्वयायोगात्वेच्च: पचमान इत्यादावनन्वयवा २
रणाय तत्र तस्य कर्त्ता वाच्य इति वाच्यं। लः कर्मणीति सूत्रस्य वैरूप्यापत्तेः। अस्मन्मते तु पधानवैरू

त्या

प्यंतथाख्यातार्थनिरूपणावसरेप्रपंचि पिध्यामः नचलैस्यशक्ततावच्छेदकत्वेपितिबाद्यादेश
ज्ञमलकारोपस्थितेरेवकृत्युपस्थापकत्वाल्लेशतृशानचूस्मारितानस्वरूपेणोद्बोधितादूतत्र
तीतिरितिवाच्यं। यतएवंवदताशतृशानचस्थलेकिमादेशानांवाचकत्वमभ्युपेयतेउतस्थानि
नां। नाद्यः अद्वितरनीयापत्तेः नांत्यः वैरूप्यापत्तेरितिप्रागेवोक्तं। नचादेशानामेववाचकत्वेलः
कर्मणीत्यनुशासनस्यासंगततापत्तिः। वस्तुतः तिङादिनिष्ठायाएवशक्तेरनुशासनलाघवाय
कल्पितेलकारेकल्पितत्वात्तदुपपत्तेः अत्रेदंबोध्यं। अत्रपक्षेऽर्थबोधानुकूलाशक्तिर्वर्णसमूह
एवपर्याप्तानप्रत्येकंतथासतिप्रत्येकमर्थवत्वात्प्रातिपदिकत्वात्सुबाद्यापत्तौधनंवनमित्यादौन
लोपाद्यापत्तेः किंचप्रत्येकंशक्तिमत्वेप्रत्येकंवर्णेभ्योऽर्थबोधापत्तिः किंवद्धिनीयादिवर्णोच्चारणास्व
वेपर्याप्तापत्तिः। नचप्रत्येकंवर्णैरर्थस्मरणमात्रंजन्यते। चरमेणपुनःसर्व जन्यते। प्रत्यक्षेद्वस्य

३ 3 रणोपि वैजात्यस्वीकारे वाधकाभावादिति वाच्यं प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वाद्गुरुत्वाच्च। न च
प्रत्येकावृत्तेः कथं समुदायवृत्तित्वं॥ द्वित्वादिवदुपपत्तेरिति दिक्॥ इति वर्णस्फोटः॥ [redacted] अथ पदस्फो-
टस्फोटो निरूप्यते। एवमादेशानां वाचकत्वे स्थिते घटेनेत्यादौ व्याकरणभेदेनादेशभेदात्संप्रहता ल॰ ३
वशात्प्रकृतिप्रत्ययभेदानवगमेन च प्रत्येकं ताभ्यामर्थानुपस्थितेर्विशिष्टस्यैव शक्तिरिति पद-
स्फोटपक्षः। तथाहि घटेनेत्यत्र घट इति प्रकृतिरेनेति प्रत्ययो वा घटे इति प्रकृतिर्नेति प्रत्ययो वेत्यादि-
प्रकारेण विनिगमनाविरहादनन्तशक्ततावच्छेदककल्पनापत्तेः तत्तद्ज्ञानवतां बोधानापत्तेश्च वस्तु-
तः स्थानसारे समुदायस्यैव विधानेन तद्विभागस्यैव सर्वथा ज्ञातुमशक्यत्वात्तेषु। अवैयाकरणा- राम
नां प्रत्येकं तेऽज्ञानेपि समुदायव्युत्पत्तिमात्रेण बोधाच्चेति समुदितस्यैवैतस्य शक्तिरिति। एवं ३
हरेव विष्णो वेत्यादौ प्रागुक्तरीत्या पदयोः स्पष्टमज्ञानेपि समुदायशक्त्या बोधात्समुदायस्यैव विशिष्ट-

वाक्यार्थेशक्तिरितिवाक्यस्फोटः अर्थवंतिचानर्थकानिवाक्यानिहशक्यंतइत्यादिनावृद्धिरादैच्सूत्रादि
भाष्येभ्यवहृतोयं नन्वन्वयरूपवाक्यार्थस्यापूर्वत्वात्तत्रशक्तिग्रहासंभवः तद्विषयकशक्तिग्रहेतस्या
पूर्वत्वक्षतिश्च । परंतुवृद्धव्यवहारात्प्राथमिकशक्तिनिर्णयोयथामनसोपस्थितेघटादौतथात्रापि
पदैः पदार्थोपस्थितावाकांक्षाज्ञानादिसहकृतमनसान्वयोपस्थितौतत्रशक्तिग्रहइतिचेन्नपदा
नांस्फुटमज्ञानेनपदैः पदार्थोपस्थित्यसंभवात् आकांक्षायाएववाक्यशक्तित्वेनतद्ग्रहातिरिक्त
शक्तिग्रहाभावाच्चपरंपितात्पर्यज्ञानविषयतयोपस्थितेऽन्वयांशेतात्कालिकशक्तिग्रहसंभवात्ता
त्पर्यंचनत्वदर्थविषयकबोधजननेच्छयावक्तृच्चारितत्वं घटमानयेत्यादितोघटकर्मत्वप्रकारकनि
रूपितत्वसंसर्गकानयनविशेष्यकबोधजननेच्छयावक्तृच्चारितत्वाभावज्ञानेऽन्यबोधजननेच्छयो
च्चारितत्वज्ञानेवातन्याबोधानुदयेनतयोः प्रतिबंधकत्वकल्पनापेक्षयाप्रागुक्ततात्पर्यप्रकारकनि

४

श्चयत्वेनैव हेतुतापत्तौ लाघवेन तत्स्यावश्यकत्वात् अर्थस्य प्रकारता विशेष्यत्वादि विषयत्वेन

भाताघेन रूपेण वाक्यार्थबोधस्तेन रूपेणाऽतात्पर्यज्ञानाविषयत्वेन च न वाक्यार्थस्यापूर्वत्वहानिरि

ति तन्न। तस्यापूर्वत्वेन तद्विषयकशक्तिग्रहवत्तद्विषयकतात्पर्यनिश्चयस्याप्यसंभवात्। शक्तिग्र

हेपि अर्थस्य प्रकारतादि विशेषणतयैव भानेनापूर्वत्वासत्तेश्चस्तुकादिवाक्येन तात्पर्यमतिरेकनि

श्चयेपि शाब्दबोधेन तत्र हेतुत्वासंभवाच्च। एतेनापूर्वत्वं नाम शब्दजन्योपस्थितिसविषयत्वमेवेति

प्रकारान्तरेणागृहीतेन तात्पर्यनिश्चयविषयत्वसंभव इत्यपास्तं। न चेश्वरं तत्र तात्पर्यज्ञानस्य फले

कोन्नेयतया प्राकृ इत्यत्र [redacted] त्। अत एवेश्वरात्तत्वनिर्णयवत्तां मीमांसकादी

नां बोधः। वेदवाक्यार्थोपानापत्तेश्च। न च तत्राव्यापकत्वात्पर्यमूरर्व्याप्यापकोक्तेन तद्भावा

त्। मीमांसोपयोगस्कन्माय जन्यलाघवादि ज्ञानस्य वेदजन्यशाब्दबोधे तदप्रामाण्यनिश्चयेवा

हेतुत्वात्। नच विशेषणकुंठकत्वाद्व्यञ्जनावृत्त्या बोधे तात्पर्यधियो हेतुत्वेन शुकादिवाक्यस्य वेदस्य च तथा
त्वेन नन्दो घट इतिवाक्ये। विशेषणस्यानियतत्वात्। अपि वास्मदादिवाक्यादर्थद्वयविषयकशाब्दबोधोत्पा पो २
पत्ते प्रकरणादिहेतुकस्येति न जानीम इति सर्वजनीनानुभवविरोधान्न तस्य शाब्दबोधहेतुत्वं अ
त एव पयः पानमयेत्सुके ऽप्रकरणज्ञस्य दुग्धं वानेयं जलं वेति प्रश्नादिकं संगच्छते। नच तत्र पदार्थो
सत्ले ५ पस्थितिः न शाब्दबोध इति वाच्यं पयः कर्मत्वमानयनं प्रेरणोतिवा व्यञ्जनया पदार्थोपस्थितावपि
तदापत्तेः सर्वत्रैवमेवापत्तौ शाब्दबोधोच्छेदापत्तेश्च। एतेन मानस एव तत्र बोध इति उपस्थितप
दार्थानां संसर्गाग्रहमात्रेण प्रश्नादिसिद्धिरिति च परास्तं शाब्दयामीत्यनुव्यवसायात्तात्पर्य
निर्णयादेरुपयोगस्य प्रामाण्यनिश्चयद्वारा प्रवृत्त्याविनिगमनाविरहाच्च। नचैवमभ्यस्ततात्पर्यकत्वेन
निर्णीतात् गेहे सैंधवमस्तीति वाक्यात् गेहे लवणमस्ति न वेति संशयस्यानुच्छेदापत्तिः। तत्रापि

उ

५ रापसंशयेनतदंशच्छेदानंतरभावोल्लिङ्गापत्तिरेवात तस्माज्जसरत्वाभावत्वात्स्मान्यपरत्वज्ञानस्य
5 च फलवलात्प्रतिबंधकत्वमेव कल्प्यमपद्वित्सत्वेतन्नदर्थविषयबोधानुभवः प्रामाणिक इत्यै
रवस्यादोषत्वादिति चेन्न। वृद्धव्यवहारदर्शनसहकृतस्तत्सोपस्थितविशिष्टेऽपदेशादिनोत्पद्य वा२
हसंभवात्। वस्तुसाहचर्यप्रमदाघटार्थस्यकर्मत्वादेश्च संसर्गशक्तियहस्यैवमेवोपपाद्यत्वात्। इदमे
वाभिप्रेत्य अर्थे क्रियाख्यसंबंधायग्रहणं चेत्स मंपदे लक्षणादधुना चेत्तत्तदर्थेष्वव्यक्तगत्याः इति
भ८ वैयाकरणामतोऽनन्तदीक्षिताः। लक्ष्यतेऽनेनेति लक्षणं मनद पदशो वा। अपिभिन्नक्रमः। वाक्ये
पीत्यर्थ इति दिक्। एवं घटमानयेत्यादौ संसर्गरूपो वाक्यार्थ एव समुदायशक्यः। वृद्धव्यवहाराद्न राम
यमतो विशिष्टे वाक्यार्थे शक्तियहेऽपि आवापोद्वापाभ्यां पदार्थानां पदेषु शक्तिकल्पनात् वाक्यस्य ५
परिशेषेणासंसर्ग एव तत्सिद्धेः। नत्वाकांक्षादिसहकारेण पदैरेव संसर्गस्यापि भानोपपत्तेत

त्रवा क्यस्यापि शक्तिकत्वेनमानाभावो गौरवं वा आकांक्षा च घटकर्मकानयनमित्यादिबोधे घट
पदोत्तरामूपदस्य ततो धातोस्तत्वाख्यातस्येत्यादिसमभिव्याहारविशेषरूपज्ञानस्य कारण
त्वरूपात् तज्ज्ञानं च कारणं अत एव घटः कर्मत्वमानयनं कृतिरित्यादितो विपरीतव्युत्पन्नस्य बोधः
सद्व्युत्पन्नस्य चाबोध उपपद्यते एतेन पदस्य हेयर्थेन सहतात्पर्यविषयीभूतयादृशार्थान्वयबोधजन
कत्वसदेतस्य पूर्ववर्तित्वानवर्जितत्वादिरूपं समभिव्याहारस्तादृशबोधे आकांक्षा तज्ज्ञानं कारणमि ताप
ति परास्तं। सद्व्युत्पन्नासद्व्युत्पन्नविभागोच्छेदापत्तेः। यद्वा तत्सरिहारापयादृशबोधेपदसमभिव्याहारं
कारणं नादृशाबोधे तत्कारणत्वज्ञानमपि तथैसुमतेन तीवरस्पकत्वात्सेवाकांक्षास्माकंयत्रतु अकार
णत्वनिश्चयः प्रतिबन्धकः तस्य द्व्यतिरेकप्रयुक्तत्वात्सर्वविषयतावच्छेदकावच्छिन्नान्वयानंतु भा
वकत्वनिश्चयो वा कारणं अत्र विशिष्ट कारणमित्येकैनादृशनिश्चयत्वेन पसद्व्यतिरेकप्रयुक्त।

६ न्वयानुभवाभावप्रतियोगितावच्छेदकावच्छिन्नविषयकश्रोतृनिष्ठतात्पर्यज्ञानत्वेनवाहेतुत्वेविनि
6 गमनाविरहात्प्रत्ययेवान्वयाननुभावकत्वेतात्पर्यनिश्चययोर्हेतुतेतितत्त्वमितितन्नघटमानयेत्या
दितोघटपदात्मकपदयोः प्रत्येकंगृहीतशक्तिकस्यतादृशानुपूर्वीज्ञानादिमतोऽकारणात्वनिश्चया
भाववतश्चविपरीतस्यसत्त्वस्यबोधापत्तेर्गौरवाच्च।एतेनांत्योपधिपरास्तइतिचेन्न।पदानांपदा
र्थेष्वपिशक्तिसिद्ध्यनापत्तेः।घटत्वप्रकारकघटविशेष्यकबोधेघटपदज्ञानस्यतत्कारणत्वज्ञान
स्यचकारणतयेवादोषात्।नन्वेश्वरेच्छाविषयत्वरूपशक्तेः कृत्यत्वेननकिंचिद्बाधकंममकल्प्यं
।अस्माद्वाक्यादयंसंसर्गोबोद्धव्यइतीश्वरेच्छाविषयत्वस्यममापिक्लृप्तत्वात्।नचसानशक्तिः राम
विनिगमनाविरहात्।नचजनकत्वस्यवद्ध्यपदार्थघटितत्वेनतस्यकारणतावच्छेदकत्वापेक्षयांनिरि ६
क्तशक्तेरेवनत्त्वमुचितमितिवाच्यं पितुलत्वात्।अतिरिक्तपदार्थकल्पनेगौरवाच्च।यदिनुजनकत्वमे

तिर

ममा

वाखंडोपाधिरूपं स्वीकृत्य तत्रैव शक्तिरिति ब्रूषे तदा वाक्यस्फोटः पदज्ञानकारणस्वरूपपदशक्ति
ज्ञानस्यैव तत्समुदायज्ञानकारणत्वरूपवाक्यशक्तिज्ञानस्य हेतुतायास्त्वयाभ्युपगमात्। न च ज्ञात
कतायाः शक्तित्वे पदे शक्तमिति व्यवहारानापत्तिः। न हि पदं बोधकारणमपि तु तज्ज्ञानमिति वाच्यं
।अनुमितौ लिंगस्येव स्वज्ञानद्वारा तस्यापि तत्त्वात्। एवं च वाक्यशक्तिरेवाकांक्षेति परं परिभाषामा ति४
सं५ त्रमवशिष्यते। अतएव संसर्गो वाक्यार्थ इति किंवदंती संगच्छते। प्राथमिकशक्तिग्रहस्य सर्वथा तत् चं५
चं४ बाधः। अतएव समासग्रहणं वाक्ये ऽनियमार्थमित्यवारणायेति भाष्यादिग्रंथाः संगच्छंते तेन दुक्तं हरिणा।
अखण्डैकीयदि वाक्यार्थः पदार्थापित्तपा भवेदिति केचित्तु परमानमेसांदावाच्ये केव शक्तिर्वि
शिष्टवाक्यार्थनिरूपिता समुदायेष्वसन्नानात एव बोधस्यानुभाविकत्वात्। व्यवहाराधीन
प्रथमव्युत्पत्त्या समुदाये विशिष्टनिरूपितायाएव शक्तेर्ग्रहाच्च। न चावापोद्वापाभ्यामवयव ए

७ क्ति निर्णायेनतस्याप्रामाणिकत्वमितिवाच्यं । असंज्ञातविरोधित्वेनोत्तरकालजस्यैवतत्वकत्वनत्व
7 न्नहरेवेत्यादौतथावधत्वकत्वाद्धनवाविशिष्टशक्तस्यतानेपिप्राप्युक्तरीत्याशक्तिग्रहाद्दोषेव्यभिचारं
त्वदुक्ततदग्रहेपिविशिष्टशक्तिग्रहमात्रेणावोधेनवापिव्यभिचारात् विशिष्टशक्तिग्राहकेनियम
ग्रा४ नर्स्व [redacted] हकत्वस्यापिस्वीकारान्नदोषइतिचेन्न हिं समापतनदोषः तथाहिनैवकारकविभक्तिवि ता॰दि॰५
शिष्टपदर्थांनुपदयोः विशिष्टयोः कारकविशिष्टक्रियावोधकत्वमितिसामान्यतः शक्तिग्रहेमंतरं
पदविशेषसमभिव्याहारज्ञानेसतितात्पर्यवशात्पदार्थविशेषविशिष्टक्रियावोधइत्यभ्युपग
मेनत्वयापिसामान्यतः कार्यकारणभावांगीकारेणचनैतत्कार्यकारणभावग्राहकस्यैवनियम
ग्राहकत्वर नोविशिष्टशक्तिस्वीकारादित्याऽः नद परेनसमंतेघटमित्येतावतापिघटकर्मत्ववोधदर्शनात [redacted] राम
[redacted] स्यतत्रशक्तेरावश्यकत्वेनतथैवचतदोष

संभवेण नः समुदायशक्तेरर्पितद्विषयकत्वकल्पने मानाभावात्। पदार्थविशेषविशिष्टक्रियाबो
धापदेशक्तेस्तत्वाप्यावश्यकत्वात्‖ कारकत्वविभक्तित्वधात्वादिज्ञानतो तयाशक्तिग्रहासं
भवात् तत्समासस्य यथाशक्तिग्रहस्तस्य तत्र एव बोधः। अव्यवहितोत्तरत्वादिनिवेशेन च कार्यका
रणाभावे व्यभिचारपरिहारः। वाक्यशक्तिग्रहे: [illegible]कस्य विद्विशिष्टैककस्य विस्कारकत्वादिज्ञानतः
मा ५ प्रागुक्तरीत्यैव सांप्रतं कस्यचित्प्रकाशान्तरे तौ वैस्पा नियत एव। सच तत्तत्पदार्थनिष्ठप्रकारता नि
रूपिता तत्तत्पदार्थनिष्ठविशेष्यता निरूपिता च या सांसर्गिकी विषयता तदाश्रयत्वं तत्तदर्थस समु
दायः शक्तेरस्यैवं विशेषणविशेष्यभावापन्नार्थ एव। एतेन स्वतन्त्रशक्तिज्ञानाद्विशेषणत्वलपदा
र्थोपस्थितौ सत्यां विशेषणविशेष्यभावप्रसा सेनान्वयः स्यादित्यपास्तं। जातिशक्तिवादे सं
सर्गवृत्तिधर्म एव वाक्यस्यापि शक्यो बोधः। वस्तुविशिष्टशक्तिग्रहे पदशक्तिग्रहः कारणं। प्रत्येक

८ परशक्तिग्रहाभावे वाक्यार्थबोधस्याजायमानत्वात्तत्सत्वेऽपूर्ववाक्यश्रवणोपि तस्य जायमा
४ नत्वाच्चेति। न च सारं। वाक्यांशान्वयहेतदभावादेवाद्येतदभावोपपत्तेः तत्सत्वे तु जायते एवात्रत एव
समुदायशक्त्यसत्वा समुदायार्थबोधेपि माकरणाद्युत्पत्तिं विना पदविभागस्यार्थाभावोऽनुभवसि
द्धः संगच्छतेऽस्याद्भुः। न च वाक्यशक्त्यंगीकारे समभिव्याहारान्वेसेन गौरवं। प्रामाणिकत्वात्तत्वापि
तावत्कार्यकारणभावावश्यकत्वाच्च। नन्वघटप्रकारकशाब्दबोधमात्रे घटार्थकपदोत्तरस्वार्थकत्स्व प्रे ५
जन्यो ४ पनिपातानन्तरोपस्थितिर्हेतुः। एवं विशेष्यता संबंधेन कर्मत्वविषयकशाब्दबोधमात्रे कर्मत्वार्थ
कामप्रत्ययप्रकृतिजन्योपस्थितिर्हेतुरिति सामान्यत एव कार्यकारणभावः। न च घटः कर्मत्वापित्स राम
तोविपरीतमुत्पन्नस्यतया बोधात्व्यभिचारः। घटबोधकपदोत्तरपरजन्मज्ञानत्वेन कर्मत्वबोध ८
कपदप्राग्वर्तिपदजन्मज्ञानत्वेन च हेतुत्वाद्दोषः। न चैवमपि पटादित्वाद्यसाणिकघटपदघटितघटमा

नयेतिवाच्यमाश्रयावोधकारणाय घटवोधकत्वं घटवोधकफलोपहितत्वं निवेश्यं । एवं चान्योन्याश्र
मात्तादृशकार्यकारणभावग्रहासंभवइतिवाच्यं । तत्र घटस्य हेतिअन्योन्याश्रयस्याभावादेवतथावो
धकारणेन स्वरूपयोग्यत्वनिवेशेपितस्याभावादितिचेन्न कर्मत्वं घटत्वेत्र मूर्तवृत्तेरस्येनादृशासमभि
नं ८ व्याहारस्तुस्पन्नानांतत्तसाथावोधेव्यभिचारात् सद्युत्पन्नासद्युत्पन्नविभागोच्छेदापत्तेश्चतेनचता
दृशहेतुतायास्तानस्यापिकारणत्वान्नदोषइतिवाच्यं सामान्यविधतज्ञानस्यापिसत्वान्नेनचतन्नवृत्त[redacted]
धू ८ त्तिविशिष्टशाब्दवोधेतन्नेत्युत्पत्तिहेतुः नबोधजनकत्वज्ञानंवच्युत्पत्तिः [redacted]वैशिष्ट्यंचस्याव्यव
हितोत्तरोत्पत्तिकत्वस्वसामानाधिकरण्योभयसंबंधेनेतितिनदोषइतिवाच्यं । अनंतकार्य[redacted]कार
णभावतादवस्थ्यात् । प्रत्ययत्वनिपातत्वाघटज्ञानत्नस्यकार्यकारणभावग्रहासंभवाच्च निरूपक
त्वादिसंबंधरूपवाक्यार्थस्यैकत्वात्तद्रूपवाक्यार्थविषयानद्वोधकसर्ववाक्येष्वेकैवशक्तिः कार्यस्येत्या

८ तं पर्याये ष्विव घटमानये स्मतः पटकर्मकबोधाभावस्य पटस्य पराहतु पस्थितेरि स्वापि वदं तिानवस्थावाक्ये
9 न रुद्धोध कृतयेच्छाविषयत्वादिं परंतु तस्य वृत्तित्वे किं मानमिति चेत्‌ विनिगमनाविरहः कार्यकारणभा
वत्वाद्यं वं चेति गृहाण । तथा हि मम मनेतत्‌ धर्मावच्छिन्न तद्विषयकशाब्दबुद्धित्वावच्छिन्नं प्रति तद्धर्मा
वच्छिन्न निरूपित वृत्ति विशिष्टज्ञानं हेतुरित्येक एव कार्यकारणभावः । न तु सांसर्गिक विषयताशा
लितद्विषयकशाब्दबुद्धौ आकांक्षाज्ञानकार्यकारणभावे चाधिकं वृत्तिज्ञानकार्यकारणभावे च
प्रकारताविशेष्यतयो र्विशिष्य निवेशस्य परं चं गौरवं । विशेषणविशेष्यभावव्यत्यासेन गृहीतश
क्तिकात्‌ घटपदात्‌ घटत्वविशिष्टघटबोधवारणाय तद्धर्मावच्छिन्नेति । तद्वृत्ति वैशिष्ट्यं च स्वविषय
कोद्बुद्धसंस्कारसामानाधिकरण्य स्वाश्रयविषयकत्वोभयसंबंधेन ज्ञाने बोध्यं । अन्योन्यागृहीत राम ८
वृत्तिकस्य बोधः । नापि पदाघज्ञानवनरस्ताद्धुः अपरे तु अनंत कार्यकारणभावेषु वृत्तिप्रवेशापेक्षया

त्स्पर्शादिज्ञानस्यैवैतद्धेतुतास्त्वा। ज्ञानेनैव घटत्वप्रकारकघटबोधस्य वारणान्नावृत्तिज्ञानकार्यकारण
भावस्य विषयतया शाब्दवृत्तिज्ञानेकारणमित्येके। एवं अत एव दंडी संयोगवानित्यतो न संयोग
संसर्गकबोधः परस्पराननुवृत्तिज्ञानकार्यकारणभावे प्रकारताविशेष्यतान्तरसंबंधेनैवनिवेश
२८ ज्ञौरवात् संसर्गबोधे आकांक्षाज्ञानकार्यकारणभावकल्पनागौरवं चानवहत्रे। शक्तिलक्षणान्यतररू
पतयाकार्यकारणभावद्वये तत्र व्यभिचारवारणाय अवच्छिन्नोत्तरत्वनिवेश आवश्यक इत्येके॥
वेत्यसंगतमिति विवाच्यानत्वापि समत्वात् वस्तुतस्तु बोधकत्वानिरूपितालक्षणानात्स्ये वैस्मात्कुं।
व्यक्तिस्थानीयापत्तेरभावात् कार्यतावच्छेदकावच्छिन्नस्य जायमानत्वाद्विशाब्दवृत्तितावच्छिन्नेशब्द
ज्ञानेकारणमिति पदादिज्ञानकार्यकारणभावोप्येक एवेत्याऊं तद्भयमपि चिंत्यं। अग्रहीनश
क्तिकयत्किंचिद्विषयकशक्तियहवतो बोधानापत्तेरित्यपरे। एतेन विशेष्यप्रकारसंसर्गसाधारणवि
का१

१० षयतासत्त्वेमानाभावेनविशेष्यादित्रितयव्यवहारानुरोधेनविशेष्यतादित्रितयस्यावश्यकत्वेनविष
10 यतेतिसामान्यशब्देनत्रयाणामेवाभिधानात् [redacted] संभवाच्च विषयतात्रितयस्यका
र्यकारणभावेनिवेशापेक्षयाद्वयोर्विशेषणत्वलाघवेनद्वयघपिविषयतानानविषयस्वरूपाघटेविष
घटो४ यइसत्तौघटस्वरूपतानिसन्तरवबोधानापत्तेः। अतीतानागतज्ञानादेर्विषयस्वरूपविषयतानाविरहे
पि५ णातिविषियत्वप्रसंगाच्च घटत्वादिनानिर्णयेतद्रूपविशेष्यत्वाभिन्नत्वेनतत्घटत्वनिष्ठप्रकारताविशेषि
तेविषयतानवेतिसंदेहाच्च घटभूतलसंयोगानुयोगित्वादीनीसादिसम्बन्धेवनघटवद्भूतलमितिवि
शिष्टबुद्धौवैलक्षण्यानुपपत्तेश्चतथापिज्ञानस्वरूपैवसानातिरिक्तामानाभावात्गौरवाच्च। एवंच राम
ज्ञानसंबंधेनशाब्दत्वमेवकार्यतावच्छेदकमितिकगौरवंनचज्ञानस्वरूपत्वेघटवद्भूतलमित्यादिज्ञा १०
नानिरूपितानांघटभूतलादिनिविषयतानांमभेदापत्तानाहृशज्ञानानंतरंघटप्रकारकज्ञानवानहमि

तद्रूपविशेष्यताभिन्नत्वेन तस्य घटत्वादिनिष्ठप्रकारतानिरूपितेति २

त्तिचनभ्रमत्वप्रकारकज्ञानवानहमित्याद्यनुव्यवसायापत्तिः किंच घटपटावितिसंमूहालंबनज्ञा
नस्य भ्रमत्वापत्तिः पटनिष्ठतन्मतेनरूपविशेष्यतायां घटत्वप्रकारतानिरूपितत्वेन तदभाववत्पटादि पं२
निष्ठविशेष्यतानिरूपकत्वात् अपि च यथा ज्ञानं स्वरूपेण घटादिना संबद्धमिति घटादिविषयक
त्वमवहारमाधत्ते तथा स्वरूपेण ज्ञातादिनापि संबद्धत्वात् विषयत्वव्यवहारमप्याद्ध्यात्।। किंच
ज्ञानेघटोविषयइत्यतो वो धानुपपत्तिः। एकस्य निरूप्यत्वनिरूपकत्वयोरसंभवादिति वाच्यं। घटत्वभ्र
मत्वमित्यादिज्ञानानां घटादिनिष्ठप्रकारताभ्रमत्वादिनिष्ठविशेष्यताद्रूपत्वांगीकारेपि फलत्वसत्वान्
अनुभवबलाच्च घटनिष्ठविशेष्यताभ्रमत्वनिष्ठप्रकारताघनात्मकत्वाद्दोषः अन्यथातिरिक्तत्वांगी
कारेपि तज्ज्ञानानां घटादिनिष्ठप्रकारतानिरूपकत्ववत् निष्ठविशेष्यतानिरूपकत्वं कुतो नेति प्रश्ने स्वके
नैव तत्त्वोत्तरं स्यात्। एवं समूहालंबनस्य घटत्वनिष्ठप्रकारतानिरूपितघटनिष्ठविशेष्यतात्मकत्वेपित

विशेष्यता १

त्वे ता ता

११ ।निरूपितनपटनिष्ठैनात्मकत्वान्नभ्रमत्वं ।ज्ञानत्वेनानिरूपकैस्य विषयित्वेन निरूपित्वसंभवाच्च ।नचज्ञा
नस्वरूपस्य ज्ञानाद्यज्ञत्वात् ततः पूर्वं ज्ञातइति प्रतीत्यापत्तिरिति वाच्यं ।ज्ञानसत्त्वे इष्टापत्तेः तदभावे
स्वरूपाभावादेव प्रतीत्यभावोपपत्तेरिति चेन्न ज्ञानव्यक्तीनामननुगतत्वेनानुगतैककारणाभावासं कार्यं ३
भवस्यान्तरवस्यत्वादित्यपास्तं विषयतात्वस्यातिरिक्तस्यांगीकारेणानुगमसंभवाच्च विषयो वि
षयइत्याद्यनुगतव्यवहारेण प्रायशः कार्यतावच्छेदकतया चातिरिक्तैकविषयताया अंगीकारेत्य व्यं ५
त्यभावाच्चेत्याहुः ज्ञानं चाकाशोस्तीति वाक्यं शब्द एव ततः आकाशपदहृत्संबंधेन शब्दसंस्कारस्य तत एव पदा अनु ४
समवायेन स्मृते आकाशे तद्विषयशाब्दबोधापत्तिरिति चेन्न प्रकारताविशेष्यतान्यतरसंबंधेन
शाब्दप्रतीतेनैव हेतुत्वं जन्योपस्थितेरपि हेतुत्वेनादोषात् इत्यापदजन्यपदार्थोपस्थितिरेवासत्तिपदेनो राम
च्यते ।अतएव प्रत्यक्षदृष्टस्य तेन तदादेः प्रतीतेस्तज्जन्मशाब्दबोधविषयतानापत्त्यावधानमा ११

12

सतिरितिन्नुन्नप्रकेगिरिर्भुक्तमग्निमान्देवदत्तेनेत्यत्र योजनयान्वयबोधानापत्तेः योजनावाक्यादि
वान्वयबोधइति चेन्न प्रथमवाक्यस्याबोधकत्वापत्तेः योजनावाक्यं वैतात्पर्यग्राहकत्वेन प्रकरणा
दिवदुपयुज्यत इति बोधेन च घटमानयेति वाक्यं हस्तिनं च स्मरहोलेकन विषयास्मरतो घटपदादिभ्यो
घटादेर्हस्तिनश्च हस्तिपकस्यास्मरणेऽपि तेन स्मरतो सति घटानयनपर्यवसितं वत्ता हस्तिपास्थितेर्वहननरूप
न यागाद्बोधो योऽछेदापत्तिः नाहरशास्नानरूपस्यानुभवविरुद्धत्वात् तन्न्वेवमपि पदार्थोपस्थिति समयेक
स्यार्थोपस्थितिरपि कुतो न तत्वाक्यस्यापि संबंधग्रहात् किंच पदार्थानामिव वाक्यार्थस्यापि स्मर
णमेव स्यान्नानुभवः संबंधिज्ञानजन्यैव पदज्ञानवत् दुपयोगादिति चेन्न फलबलात्तदार्थोपस्थितेः
पूर्वं ज्ञिप्तमनो वाक्यार्थांशे ऽनुबोधकात्सुमवधानकल्पनात् एवं च वस्तुसाधोर्हरेवेत्सारो च विशिष्टघटा
ऽमेव संसर्गांशेऽप्युद्बोधकासम

१२